**|| श्री हनुमान कवच मंत्र ||**

**श्री गणेशाय नम: |**

**ॐ श्री हनुमते नमः |**

ॐ अस्य श्रीपञ्चमुख हनुमतकवच मंत्रस्य ब्रहमा ऋषि: |
गायत्री छंद्: | श्रीपञ्चमुख विराट हनुमान देवता| ह्रीम बीजम् |
श्रींम शक्ति:| क्रौ कीलकम्| क्रूं कवचम्| क्रै अस्त्राय फ़ट् |

**इति दिग्बंध्:|**

श्री गरूड उवाच्|

अथ ध्यानं प्रवक्ष्यामि श्रुणु सर्वांगसुंदरम् |
यत्कृतं देवदेवेन ध्यानं हनुमत्: प्रियम्||
पञ्चवक्त्रं महाभीमं त्रिपंच नयनैर्युतम्|
बाहुभिर्दशभिर्युक्तं सर्वकामार्थसिध्दिदम्||
पूर्वतु वानरं वक्त्रं कोटिसूर्यसमप्रभम्|
दंष्ट्राकरालवदनं भ्रुकुटी कुटिलेक्षणम्||
अस्यैव दक्षिणं वक्त्रं नारसिंहं महाद्भुतम्|
अत्युग्रतेजोवपुष्पं भीषणम भयनाशनम्||
पश्चिमं गारुडं वक्त्रं वक्रतुण्डं महाबलम्|
सर्वनागप्रशमनं विषभूतादिकृन्तनम्||
उत्तरं सौकरं वक्त्रं कृष्णं दिप्तंनभोपमम्|
पाताले सिंह बेतालं ज्वररोगादिकृन्तनम|
ऊर्ध्वं हयाननं घोरं दानवान्तकरं परम्|
येन वक्त्रेण विप्रेन्द्र तारकाख्यमं महासुरम्||
जघानशरणं तस्यात्सर्वशत्रुहरं परम्|
ध्यात्वा पंचमुखं रुद्रं हनुमन्तं दयानिधिम्||

खड्गं त्रिशुलं खट्वांगं पाशमंकुशपर्वतम्|
मुष्टिं कौमोदकीं वृक्षं धारयन्तं कमण्डलुं||
भिन्दिपालं ज्ञानमुद्रा दसभिर मुनिपुंगवम्|
एतान्यायुधजालानि धारयन्तं भजाम्यहम्||
प्रेतासनोपविष्टं तं सर्वाभरण्भुषितम्|
दिव्यमाल्याम्बरधरं दिव्यगन्धानुलेपनम ||
सर्वाश्चर्यमयं देवं हनुमद् विश्वतोमुखम्|
पंचास्यमच्युतमनेकविचित्रवर्ण वक्त्रं शशांकशिखरं कपिराजवर्यम्|
पीताम्बरादिमुकुटैरूप शोभितांगं पिंगाक्षमाद्यमनिशं मनसा स्मरामि||
मर्कटेशं महोत्साहं सर्वशत्रुहरं परम्| शत्रुं संहरमां रक्ष श्री मन्नापदमुध्दर||
ओम हरिमर्कट मर्कट मंत्रमिदं परिलिख्यति लिख्यति वामतले|
यदि नश्यति नश्यति शत्रुकुलं यदि मुंच्यति मुंच्यति वामलता||

ओम हरिमर्कटाय स्वाहा ओम नमो भगवते पंचवदनाय पूर्वकपिमुखाय सकलशत्रुसंहारकाय स्वाहा|

ओम नमो भगवते पंचवदनाय दक्षिणमुखाय करालवदनाय नरसिंहाय सकलभूतप्रमथनाय स्वाहा |

ओम नमो भगवते पंचवदनाय पश्चिममुखाय गरूडाननाय सकलविषहराय स्वाहा|

ओम नमो भगवते पंचवदनाय उत्तरमुखाय आदिवराहाय सकलसंपत्कराय स्वाहा|

ओम नमो भगवते पंचवदनाय उर्ध्वमुखाय हयग्रीवाय सकलजनवशकराय स्वाहा|

ॐ अस्य श्री पञ्चमुखहनुमत् मन्त्रस्य श्रीरामचन्द्र ऋषि: अनुष्टुपछन्दः पञ्चमुख वीर हनुमान देवता हनुमान इति बीजं वायुपुत्रः इति शक्तिः अंजनी सूत इति कीलकम श्रीरामदूत हनुमत प्रसाद सिद्ध्यर्थे जपे विनियोगः |

ॐ अंजनी सुताए अङ्गुष्ठाभ्यां नमः | हृदयाय नमः |

ॐ रुद्रमूर्तये तर्जने भयाम नमः | शिरसे स्वाहा |

ॐ वायु पुत्राये तर्जनीभ्यां नमः | शिखायै वौषट |

ॐ अग्निगर्भये अनामिकाभ्यां नमः | कवचाय हुम् |

ॐ रामदूताय कनिष्ठिकाभ्यां नमः | नेत्रत्रयाय वौषट |

ॐ पंचमुख हनुमते करतलेपृष्ठाभ्यां नमः |अस्त्राय फट |

इदं कवचं पठित्वा तु महाकवचं पठेन्नरः |

एकवारं जपे स्त्रोत्रं सर्वशत्रुनिवारणम् ||

द्विवारं तु पठेन्नित्यं पुत्रपौत्रप्रवर्धनम् |

त्रिवारं च पठेत नित्यं सर्वसंपत्करं शुभम ||

चतुर्वारं पठेन्नित्यं सर्वरोगनिवारणम् |

पञ्चवारं पठेन्नित्यं सर्वलोक वशमकरम् ||

षड्वारं तु पठेन्नित्यं सर्वदेव वशमकरम् |

सप्तवारं पठेन्नित्यं सौभाग्यदायकम् ||

अष्टवारं पठेन्नित्यं सर्व अष्टकामार्थसिद्धिदम् |

नववारं पठेन्नित्यं सर्वैश्वर्य प्रदायकम् ||

दशवारं च पठेन्नित्यं त्रैलोक्य ज्ञानदर्शनम् |

एकादशं पठेन्नित्यं सर्वसिद्धिं लभेन्नरः ||

**|| ओम श्रीपंचमुखहनुमंताय आंजनेयाय नमो नमः ||**

**|| श्रीपञ्चमुखी हनुमत्कवच समाप्तं ||**